International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(5): 84-87
© 2020 IJSR
www.anantaajournal.com
Received: 16-07-2020
Accepted: 18-08-2020

**Shri Amit Das**
Research Scholar, Department of Sanskrit, University of Gour Banga, Malda, West Bengal, India

**Corresponding Author:**
**Shri Amit Das**
Research Scholar, Department of Sanskrit, University of Gour Banga, Malda, West Bengal, India

# अलंकारशास्त्रनिकाये रसस्वरूपम्

**Shri Amit Das**

**सारांश**
रस्यते आस्वाद्यते अनेनेति रसः। रसं विना काव्यं न प्रसरेत्, यदि वा प्रसृतं स्यात्, तर्हि तदुपहासास्पदं भवेत्। न हि रसादृते कश्चिन्न अर्थः प्रसज्यते। रसो हि काव्यस्य मूलीभूतं तत्त्वम्। रसो हि काव्यात्मा इति काव्यशास्त्रविदां डिण्डिमः। विभाव-अनुभाव-व्यभिचारिसंयोगादेव रसस्य निष्पत्तिर्भवति इति मतम् आलंकारिकाणाम्। भरतादारभ्यः जगन्नाथान्तं यावत् प्रायः सर्वे काव्यतत्त्वविदः रसस्य सर्वातिशायित्वं व्याकृतवन्तः नम्रशिरसा । अस्मिन् शोधप्रबन्धे अहं भारतात् जगन्नाथं यावत् आलंकारिकाणां मते रसस्य अर्थः, स्वरूपं, उत्पत्तिप्रक्रिया चेति विषयाः पर्यालोच्यन्ते ।

**मूलशब्दावली:** रसः, रसनिष्पत्तिः, संयोगः, काव्यम्, भरतम्, आनन्दवर्धनः, मम्मटः, विश्वनाथ, जगन्नाथः चेति।

## १. प्रस्तावना

धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च।
करोति कीर्तिं प्रीतिञ्च साधुकाव्यनिषेवणम्॥ [1]

काव्यस्य पूर्वोल्लिखितेषु प्रयोजनेषु मुख्यप्रयोजनमस्ति आनन्दलाभः। परमात्मा हि रस इति आम्नायते उपनिषदि। उक्तञ्च - 'रसो वै सः' [2]। विश्वनाथेन काव्यलक्षणनिरूपणप्रसङ्गे उक्तं - 'वाक्यं रसात्मकं काव्यम्' [3]। रस एवात्मा साररूपतया जीवनधारायको यस्य तेन विना तस्य काव्यत्वानङ्गीकारात् रस्यत इति रस इति व्युत्पत्तियोगाद् भाव-तदाभासादयोऽपि गृह्यते। काव्यस्य आस्वादनमेव रसः।
आलंकारिकाणां मते, रस एव काव्यस्य आत्मा, शब्दार्थौ तावत् काव्यशरीरम्, गुणं शौर्यादिवत् काव्यैश्वर्यम्, अलंकारश्च कटककुण्डलादिवदिति। काव्यात्मना रसेन सह गुणालंकारयोः सम्बन्धः अङ्गाङ्गिभावेन सम्पृक्तः। काव्यगुणाः काव्यात्मभूतरसाश्रिताः। लौकिकालंकारा यथा मानवदेहस्य सौन्दर्यं वर्धयन्ति, तथैव काव्यालंकाराः काव्यस्य सौन्दर्यम्। अतएव गुणा वा स्युः अलंकारा वा सर्व एव रसनिर्भराः। तथाहि भरतेनोक्तं – न हि रसादृते कश्चिदर्थः प्रवर्तते। प्राचीनालंकारशास्त्रे काव्यरस-नाट्यरसयोः नास्ति प्रभेदः कश्चित्।

---

[1] *काव्यालंकारः* (१.२)

[2] *तैत्तिरीयोपनिषद्*

[3] *साहित्यदर्पणः (हरिदास)* (१.३)

### १.१. प्राचाम् आलंकारिकाणां नये रसस्वरूपम् -
### १.०. भरत-अभिनवगुप्तयोर्नये रसः -

रसतत्त्वविषयकं मौलिकम् अभिमतं सर्वप्रथमं तावत् प्रदत्तं भरताचार्येण स्वकनाट्यशास्त्रे। तन्मतेन - 'विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः' [4]। रसं विना न कोऽपि पदार्थः प्रतिपद्यते। नाट्यरसस्य विभावादिभिर्निष्पत्तौ मधुरादिप्रभृतिभिर्लौकिकस्य षड्रसस्य निष्पत्तिं दृष्टान्तरूपेण प्रदर्शयन् भरत एवमाह - 'को वा दृष्टान्त इति चेत् ?- उच्यते, यथा नानाव्यञ्जनौषधिभिद्रव्यसंयोगाद् रसनिष्पत्तिः, तथा नानाभावोपगमाद् रसनिष्पत्तिः, यथा हि गुडादिभिः द्रवैः व्यञ्जनैः औषधिभिश्च षाडवादयो रसा निर्वर्त्यन्ते, एवं नानाभावोपहिता अपि स्थायिनो रसत्वमाप्नुवन्ति।' इति। अस्यायमभिप्रायो वर्तते नानाविधानां चिञ्च-आज्य-अम्ल-तिक्तादिरसयुक्तानां व्यञ्जनानाम्, गोधूम-चूर्णादिरूपाणाम् औषधीनाम्, गुडादीनां द्रव्याणां च सम्यक्तया दक्षपाचकेन यथामात्रं पाकक्रमेण सम्यग् मेलनेन संयुज्यमानानां तेषां व्यञ्जनादिपदार्थानाम् अम्ल-तिक्त-मधुरादिरसेभ्यो विलक्षणेन रसेन युक्तो विलक्षणः षाडवशब्देन बोध्यः पदार्थो निष्पद्यते। अयं व्यञ्जनेभ्य औषधिभ्यो द्रव्येभ्यश्च विलक्षणः पदार्थो मधुरादिभ्यः प्रसिद्धेभ्यो लौकिकरसेभ्यो विलक्षणेन रसेन युक्तो भवति रसनीयश्च भवति। नाट्यरसोऽत्र दार्ष्टिन्तिको वर्तते।

यथा गुडादयः स्वात्मनि चिञ्चादिरसं चिञ्चादिषु गोधूमादिषु च परत्र स्वकीयं मधुरं रसं संक्रामयन्ति सर्वान् षाडवस्य घटकीभूतान् पदार्थान् एवम् उपरञ्जयन्ति च तथा नाट्यरसस्यापि निष्पत्तौ व्यभिचारिभावाः स्थायिनाऽत्मानं स्वात्मना स्थायिनं च उपरञ्जयन्ति। यथा षाडवरसस्य निष्पादने सर्वेषां गुडादिपदार्थानां मिश्रणात् पूर्वं केवलेन व्यञ्जनस्य संयोगेन जनितो रसविशेषो भवति। तथैव दार्ष्टान्तिके केवलेन विभावेन जनितः स्थायी भावो मन्यते। यथा भरतेन रससूत्रे विभावादीनां त्रयाणामेव ग्रहणं कृतम्, न तु स्थायिनः, तथाऽत्रापि दृष्टान्ते व्यञ्जन-औषधिद्रव्यरूपाणां त्रयाणामेव पदार्थानां ग्रहणं विहितम्, न तु गुडादिमिश्रणात् पूर्वं विद्यमानस्य व्यञ्जनमात्रसंयोगजन्यस्य रसविशेषस्य। एष गुडादिमिश्रणात् पूर्वं विद्यमानो रसविशेषो लौकिक एव भवति, किन्तु गुडादिमिश्रणेन निष्पन्नः षाडवरसो मधुरादिविलक्षणत्वेन लोकोत्तरो वक्तुं शक्यते। एवमिह स्थायी भावो लौकिकः, रसस्तु लोकोत्तरो भवति।

दृष्टान्तदार्ष्टन्तिकयोः पूर्वोक्तं साम्यम् अभिनवभारत्याम् एवं प्रतिपादितम् - 'व्यञ्जनम् उपसेचनद्रव्यम्।... मधुरचुक्रादिभेददधिकाञ्चिकादि। ओषधयः चिञ्चागधूमदलहरिद्रादयः। द्रव्यं गुडादि।... एतदुक्तं भवति- पाकरूपया सम्यग्योजनया तावद् अलौकिको रसो जायते। तत्र प्रधानत्वेन जलस्य रसाभिव्यञ्जकत्वमिति व्यञ्जनं विभावस्थानीयम्। चिञ्चाहरिद्राद्यनुभावप्रायम्। द्रव्याणि तु गुडादीनि तदीयचुक्रादिरसविलक्षण-मधुरादियोगाद् व्यभिचारिकल्पम्। स्वात्मनि तदुपजीवनेन च परत्र च स्वरससंक्रमणया वैचित्र्याधायकत्वात्। अत्र तु स्थायिकल्पः तन्मिक्षणसमयभावी रसविशेषो विभावकल्पव्यञ्जनजनितः। स हि लौकिकः। अयं तु कुशलैकनिर्वर्त्यः तद्विदां रसनीयो भवति।... यथा हि दार्ष्टान्तिकसूत्रे स्थायिग्रहणं शल्यकल्पमिति त्रयमेवोपात्तं तथा दृष्टान्तेऽपि त्रयस्यैवोपादानं युक्तम्।' इति।

परन्तु भरतस्य रससूत्रे सूत्रकारेण 'संयोगः' 'निष्पत्तिरिति' च शब्दयोरर्थो न परिष्कृतः। एतस्मात् कारणात् परवर्तिनि काले रससूत्रमाश्रित्य नैकाश्च व्याख्याः समुद्भूताः। आसु व्याख्यासु चतस्र एव मुख्याः। ते तावत् भट्टलोल्लटस्य उत्पत्तिवादः, भट्टशङ्कुकस्य अनुमितिवादः, भट्टनायकस्य भूक्तिवादः, अभिनवगुप्तस्य अभिव्यक्तिवादश्चेति। नृत्यगीतादीनां सर्वेषां कलासाधनानां मुख्यं लक्ष्यं तावद् रसनिष्पत्तिरेव। दार्शनिकेन हेगेलमहोदयेन रसविषये कथितम् - 'The beautiful is the manifestation of idea' इति। रसास्वादनप्रसङ्गेन भरतेनोक्तम् – यथा हि नानाव्यञ्जनसंस्कृतमन्नं भुञ्जाना रसान् आस्वादयन्तः सुमनसः पुरुषाः हर्षादीन् च अधिगच्छन्ति, तथा नानाभावाभिनयव्यञ्जितत्वाद्वागङ्गसत्त्वोपेतान् स्थायिभावानास्वादयन्तः प्रेक्षका हर्षादींश्चाधिगच्छन्तीति कृत्वा ते नाट्यरसाः [5]। भोज्यपदार्थरसः नाट्यरसापेक्षया स्थूलः। पक्षान्तरेण नाट्यरसः लौकिकरसात् सूक्ष्मः। स खलु सामाजिकैः अन्तरिन्द्रियैरेव गृह्यते।

भरतेन रससूत्रे रसशब्दः प्रयुक्तः। लौकिके जगति रसशब्दो मधुरादौ, पारदे, विषये, सारे, जले, अभिनिविशे, वीर्यरूपे देहधातौ चैवमादिष्वर्थेषु प्रयुज्यते। तत्र मधुरादौ रसशब्दस्य प्रयोगे प्रवृत्तिनिमित्तं मधुरादौ वर्तमानं रसनेन्द्रियेण ग्राह्यत्वं भवति। अतो 'यो रस्यते इत्यर्थः रसनेन्द्रियेण गृह्यते स रस' इति 'रस आस्वादन-स्नेहनयोः' इति रस्धातोर्निष्पन्नस्य रसशब्दस्यार्थो मधुरादौ संगच्छते। किन्तु 'विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः' इत्यत्र शृङ्गारादौ प्रयुज्यमानस्य रसशब्दस्य प्रवृत्तिनिमित्तं किं भवेदिति पृच्छा जायते। शृङ्गारादौ हि रसनेन्द्रियेण ग्राह्यत्वं नास्ति, शृङ्गारादिर्हि मनसा, न तु रसनेन्द्रियेण। यथा मधुरादौ रसा रसनेन्द्रियेण आस्वाद्यन्ते तथा शृङ्गारादयो रसनेन्द्रियेण न आस्वाद्यन्ते। एवं शृङ्गारादौ रसशब्दस्य रसनेन्द्रियग्राह्यत्वरूपं प्रवृत्तिनिमित्तं कथमपि न संभवति। ततश्च प्रवृत्तिनिमित्तस्य अभावेन शृङ्गारादौ रसशब्दस्य प्रयोगो न संगच्छते। प्रश्नोऽयं भरतेन '**अत्राह रस**

---

4 *नाट्यशास्त्रम्* (नागरः), (६.३४)

5 *नाट्यशास्त्रम् (वरोदासंस्करणम्)*, (प्रथमः खण्डः, पृः - २८९-२९०)

**इति कः पदार्थः ?**' इति वचनेन समुत्थाप्यते। शृङ्गारादौ प्रयुज्यमानो यो रस इति शब्दो वर्तते तस्य पदार्थः प्रवृत्तिनिमित्तभूतोऽर्थः क इति कथितस्य प्रश्नवाक्यस्य अभिप्रायो भवति।

'**नाट्ये एव रसाः, न लोक इत्यर्थः। काव्यं च नाट्यमेव**' इति व्याख्यानम् अभिनवगुप्तसम्मतं वर्तते। वस्तुतस्तु काव्यमपि दशरूपकात्मकम् नाट्यमेव भवति। नाट्य-काव्ययोर्न वास्तवो भेदः। अभिनवगुप्तमते, रसस्य दुःखमयत्वं कथमपि न सम्भवति। रत्यादिवासनया चित्रितम् आनन्दघनं संवेदनमेव रस उच्यते। तस्य उद्बोधने अभिनयादिव्यापारा भवन्ति। '**अस्मन्मते स्वसंवेदनमेवानन्दघनमास्वाद्यते। तत्र का दुःखाशङ्का ? तस्यैव चित्रताकरणे रतिशोकादिवासनाप्रकारः**' इत्याद्यभिनवभारत्यां स्पष्टम्।

## १.१. ध्वनिकारनये रसः -

आलंकारिकमूर्धन्यः आनन्दवर्धनो नाट्यरसमेव काव्यरसमिति मन्यते। धन्यालोकस्य लोचनटीकायाम् अभिनवगुप्तः प्राह - 'शब्दसमर्प्यमानहृदयसंवादसुन्दरविभावानुभावसमुचितप्राग्विनिविष्टरत्यादिवासनानुरागसुकुमारस्वसंविदानन्द-चर्वणाव्यापाररसनीयरूपो रसः' [6]। आत्मसंविदः प्रतीतिरेव रसः। रसस्य कोऽपि स्वरूपभेदो नास्ति। तत्रभवान् ध्वन्यालोककृद् उवाच - 'अद्भूतभोगात्मस्पन्दाविष्टस्य च मनःकरणं रसोपलब्धिमात्रः तत्कालसारैः बोधितः'। सहृदयैः रसः अलौकिकरूपेण गृह्यते आस्वादप्रमाणत्वात्। रसस्य अन्यतरं लक्षणं कादाचित्कम्। आनन्दवर्धनेन तदीये ध्वन्यालोके रसविषये कथितं 'नास्त्येवदेवस्तु यदभिमतरसाङ्गतां नीयमानं न प्रसूनीभवति। अचेतनापि हि भावा यथायथम् उचितरसभावतया चेतनावृत्तान्तयोजनया वा न सन्त्येव ते ये यान्ति न रसाङ्गताम्' [7]। आनन्दवर्धनमते, रसध्वनिर्हि काव्यात्मा । रसध्वनिः खलु रस इति तन्मतम्।

## १.२. विश्वनाथस्य मते, रसो हि आत्मा -

अलंकारशास्त्रे विश्वनाथो हि प्रथमः काव्यतात्त्विको यो रसं काव्यत्मत्वेन व्याख्याति। तन्मते, वाक्यं यदि रसात्मकं भवेत्, तर्हि तत् रसपदम् आप्नोति। विश्वनाथेन साहित्यदर्पणस्य तृतीयपरिच्छेदे रसविषये कथितम् –

> "विभावेनानुभावेन व्यक्तः सञ्चारिणो तथा।
> रसतामेति रत्यादिः स्थायिभावः सचेतसाम् [8]।।
> इति।

सत्त्वोद्रेकाद् अखण्डस्वप्रकाशानन्दचिन्मयो रसः। अपि च, वेद्यान्तरस्पर्शशून्यो ब्रह्मास्वादसहोदरो रसः। लोकोत्तरचमत्कारप्राणः स्वकारवदभिन्नत्वेन अयम् आस्वाद्यते रसः। प्रकाशशरीरात् संवित्स्वरूपां ज्ञानरूपतापन्न एव रत्यादिः सामाजिकानाम् आनन्दचमत्कारसम्बलोपादेयत्वात् रस इति। रसे सारश्चमत्कारः सर्व्वत्रापि अनुभूयते। रस्यमानतामात्रसारत्वात् प्रकाशशरीरादन्य एव हि रसः। रसविषये विश्वनाथस्य मनसि शङ्कैका उदेति यन्ननु करुणादीनां रसानां दुःखमयत्वाद् रसत्वं न स्यादेति। तेनोक्तम् –

> करुणादपि रसे जायते यत् परं सुखम्।
> सचेतसामनुभवः प्रमाणं तत्र केवलम्। [9] इति

अस्याः शङ्कायाः निरसनाय तेनोक्तं यन्न हि कश्चित् चेतनवान् आत्मनो दुःखाय प्रवर्त्तते। करुणादिषु च सकलस्यापि साभिनिवेशप्रवृत्तिदर्शणात् सुखमयत्वमेव। लौकिकशोकहर्षादिकारणेभ्यो लौकिकशोकहर्षादयो जायन्ते इति लोक एव प्रतिनियमः। तथापि पुनः काव्ये सर्वेभ्योऽपि विभावादिभ्यः सुखमेव जायते इति नियमादत्र कश्चिद् न दोषः।

भट्टलोल्लटेन रसविषये भणितं – "विभावैर्ललनोद्यानादिभिरालम्बनोद्दीपनकारणैः रत्यादिको भावो जनितः अनुभावैः कटाक्षभूजाक्षेपप्रभृतिभिः कार्य्यैः प्रतीतियोग्यकृतः व्याभिचारिभिर्निर्वेदादिभिः सहकारिभिरुपचितो मुख्यया वृत्त्या रामादावनुकार्यो तद् रूपतानुसन्धानात् नर्त्तकेऽपि प्रतीयमानो रस" [10] इति। अपि चोक्तम् –

> "कारणान्यथ कार्याणि सहकारीणि यानि च ।
> रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः॥
> विभावानुभावास्तत् कथ्यन्ते व्याभिचारिणः।
> व्यक्तः स तैर्विभावाद्यैः स्थायी भावो रसः स्मृतः"॥ [11]

## १.३. काव्यप्रकाशे रसगङ्गाधरे च रसस्वरूपम् -

मम्मटेनोक्तम् – सम्बन्धविशेषस्वीकारपरिहारनीयमानाध्यवसायात् साधारण्येन प्रतीतैः अभिव्यक्तः सामाजिकानां

6 *ध्वन्यालोकः (विमला),* (वृत्तिः -१।४)

7 *ध्वन्यालोकः (विमला),* (३।४३)

8 *साहित्यदर्पणः (हरिदास),* (३।१)

9 *साहित्यदर्पणः (हरिदास),* (३।३)

10 *काव्यप्रकाशः (बालबोधिनी)* (चतुर्थः उल्लासः)

11 *काव्यप्रकाशः* (चतुर्थ उल्लासः)

वासनात्मकतया स्थितः स्थायी रत्यादिको नियतप्रमातृगतत्वेन स्थितोऽपि साधारणोपायबलात् तत् कालविगलितपरिमितप्रमातृभाववशोन्मेषितवेद्यान्तरशून्या परिमितभावेन प्रमात्रा सकलहृदयसंवादभाजा साधारण्येन स्वाकार एव अभिन्नेऽपि गोचरीकृतश्च अध्यमानतैकप्राणो विभावादिजीवितावधिः पानकरसन्यायेन चर्व्यमाणः पुरः एव परिस्फुरन् हृदयमेव प्रविशन् सर्वाङ्गीनमेव आलिङ्गन् अन्यत् सर्वमेव तिरोदधद् ब्रह्मास्वादमिव अनुभावयन् अलौकिकश्चमत्कारी रसः।

जगन्नाथः सप्तदशशताब्द्यां रसविषये नव्यन्यायदृष्ट्या पूर्वपक्षिमतानि निराकृत्य स्वमतं प्रस्तौति। आलंकारिकेण जगन्नाथेन रसविषयेऽपि उक्तम्– प्रमृष्टपरिमितप्रमातृत्वादिनिजधर्मेण प्रमात्रा स्वप्रकाशतया वास्तवेन निजस्वरूपानन्देन सह गोचरीक्रियमाणः प्राग्विनिविष्टवासनारूपो रत्यादिरेव रसः [12]। जगन्नाथस्य रससिद्धान्तः अद्वैतवेदान्तदर्शनाश्रयीति। जगन्नाथस्य ग्रन्थे रसस्य पूर्णविकाशः संसाध्यते इति मन्मतिः।

## परिशीलिता ग्रन्थावली


### क. मूलग्रन्थावली

- *काव्यप्रकाशः* (मम्मटः) – (प्रथमादिषष्ठोल्लासान्तः), (अनुवादकः व्याख्यातश्च) ड. विमलाकान्तमुखोपाध्यायः, (सम्पा.) विपदभञ्जनपालः, संस्कृतपुस्तकभाण्डारः, कोलकाता, 1427 (प्रथमः प्रकाशः).
- *काव्यप्रकाशः* (मम्मटः) (बालबोधिनीयुता वामनभट्टविरचिता) – भाण्डारकर-ओरियेन्टाल रिसार्च इनस्टीट्युट, पुणा, 1983.
- *काव्यादर्शः* (दण्डी) (प्रेमचन्द्रतर्कवागीशकृतः मालिन्यप्रोञ्छनीटीकासमेतः) – चिन्मयीचट्टोपाध्यायः (सम्पा.), पश्चिमवङ्ग राज्य पुस्तक पर्षद्, कलिकाता, 1995.
- *काव्यालंकारः* (भामहः) – वटुकनाथशर्मा वलदेव-उपाध्यायश्च (सम्पा.), चौखाम्वासंस्कृतसंस्थानम्, वाराणसी, 1981 (द्वितीयसंस्करणम्).
- *ध्वन्यालोकः* (आनन्दवर्धनः) (लोचनटीकासहितः) (प्रथमश्च द्वितीय उद्योतः) - विमलाकान्तमुखोपाध्यायः (सङ्कलितोऽनूदितो व्याख्यातः), अशोककुमारमुखोपाध्यायः (सम्पा.), संस्कृतपुस्तकभाण्डारः, कलकाता, 2008 (परिमार्जितं संस्करणम्).
- नाट्यशास्त्रम् (भरतः) (अभिनवभारतीटीकोपेतम्) - आर्.एस्.नागरः (सम्पा.), परिमलपावलिकेशन्, देहली, 2003 (पुनः प्रकाशितम्).
- *रसगङ्गाधरः* (जगन्नाथः) – श्रीपारसनाथद्विवेदी (सम्पा.), सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, वाराणसी, 1998.
- *रसगङ्गाधरः* (जगन्नाथः) –प. मदनमोहनझा (व्याख्याकारः), चौखम्बा विद्याभवन, वाराणसी, 2012 (पुनर्मुद्रितं संस्करणम्).
- *साहित्यदर्पणः* (विश्वनाथः) (कुसुमप्रतिमाटीकोपेतः) – हरिदाससिद्धान्तवागीशः (सम्पा.), कोलकाता, 1967 शकाब्दः (चतुर्थं संस्करणम्).

### ख. सहायकग्रन्थग्रामा

1. De S.K. History of Sanskrit Poetics, Firma KLM Pvt. Ltd., Calcutta, 1988. (Second Revised Edition).
2. De, Sushil Kumar - Some problems of Sanskrit poetics, Firma KLM, Kolkata, 1981, (1st ed.).
3. Jha VN. (1st ed.) - Glimpses of ancient Indian poetics, from Bharata to Jagannatha, edited by Sudhakar Pandey, Delhi, India: Sri Satguru Publications, 1993.
4. Kane PV. History of Sanskrit Poetics, Motilal Banarsidass Publishers Private Limited, Delhi, 2015, (5th Reprint).


12 *रसगङ्गाधरः (झा),* (२।६)